ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 47 ]
Total No. of Questions : 47 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ: **67-S**
**Code No. : 67-S**

# C

**CCE PR**
**NSR & NSPR**

Question Paper Serial No. **100**

इतः कर्तयत

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : Third Language — SANSKRIT
# तृतीयभाषा — संस्कृतम्

**(ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. & ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**
**( Private Repeater / NSR & NSPR )**

ದಿನಾಂಕ : 01. 07. 2022 ] [ Date : 01. 07. 2022
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 47 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे सप्तचत्वारिंशत् (47) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत

**Tear here**

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **10 × 1 = 10**

1. 'महाबलः' अस्य समानार्थकं पदम् इदं भवति ।

   (A) शिवः (B) ब्रह्मा

   (C) गणेशः (D) गुरुः ।

2. "एकम्" अस्य विरुद्धार्थकं पदम् इदं भवति ।

   (A) एकता (B) ऐक्यम्

   (C) अनेकम् (D) एकैकम् ।

3. 'ग्रन्थालयः' अत्र एषा विभक्तिः वर्तते ।

   (A) द्वितीयाविभक्तिः (B) प्रथमाविभक्तिः

   (C) तृतीयाविभक्तिः (D) चतुर्थीविभक्तिः।

4. 'अर्जुनस्य' अत्र इदं वचन वर्तते ।

   (A) एकवचनम् (B) द्विवचनम्

   (C) बहुवचनम् (D) अन्यवचनम् ।

5. 'गच्छति' अत्र एषः लकारः वर्तते ।

(A) लङ्लकारः (B) लोट्लकारः

(C) लृट्लकारः (D) लट्लकारः ।

6. 'अवदत्' अत्र एषः पुरुषः भवति ।

(A) महापुरुषः (B) प्रथमपुरुषः

(C) मध्यमपुरुषः (D) उत्तमपुरुषः।

7. 'रजनी विज्ञानं ज्ञातुम् इच्छति' । अत्र कृदन्तपदम् इदं भवति ।

(A) रजनी (B) विज्ञानम्

(C) ज्ञातुम् (D) इच्छति ।

8. 'प्रणम्य' अत्र एषः प्रत्ययः वर्तते ।

(A) क्त्वा प्रत्ययः (B) तुमुन् प्रत्ययः

(C) क्तवतु प्रत्ययः (D) ल्यप प्रत्ययः ।

9. अत्र समूहेतरपदम् इदं भवति ।

(A) पठनीयः
(B) ताडनीयः
(C) करणीयः
(D) ज्ञातवान् ।

10. 'उपवृक्षम्' अत्र एषः समासः भवति ।

(A) कर्मधारयसमासः
(B) अव्ययीभावसमासः
(C) बहुव्रीहिसमासः
(D) तत्पुरुषसमासः।

**II. चतुर्थं पदं लिखत ।** **$5 \times 1 = 5$**

11. विप्रवेषधारी – इन्द्रः :: अङ्गराजः – ............ ।

12. सर्वदा – शारदा :: हिमघ्नः – .............................. ।

13. संस्कृतसाहित्योत्सवः – उज्जयिनीनगरे :: विश्वसंस्कृतपुस्तकमेला – ............ ।

14. उत्सवः – पर्व :: सन्तोषः – ..................... ।

15. सुरा नम्याः – विसर्गलोपः :: मुराररपि – .......................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **5 × 1 = 5**

16. सर्वदा अस्माकं वदने का वसेत् ?

17. वामनः किमर्थं विरामम् इच्छति ?

18. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?

19. किं किं शाश्वतं तिष्ठति ?

20. अलङ्कारस्य भेदौ कौ ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **6 × 2 = 12**

21. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन् ?

22. कतिविधाः जनाः देवं भजन्ते ? ते च के ?

23. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

24. पञ्च अचोरहरणीयानि कानि ?

25. अर्जुनः कृष्णं किम् अपृच्छत् ?

**अथवा**

कर्णार्जुनयोः युद्धं कथम् आसीत् ?

26. कर्णस्य सारथिः कः ? कालपर्ययात् का क्षयं गच्छति ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

27. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

There is a beautiful garden in the city. There is a large lake in the garden.

**VI. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

28. वयं प्रतिदिनं शालां गच्छामः । तत्र संस्कृतमपि पठामः ।

**VII. 29. विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) चन्द्रशेखरः ।

b) करताडनम् ।

**अथवा**

**समस्तपदं लिखत ।**

a) दिनं दिनं = .................

b) लम्बम् उदरं यस्य सः = .................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

30. करारविन्दम् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

31. "मया एतानि सर्वाणि पुस्तकानि पठितानि" ।

क: पाठः ? क: अवदत् ? कम् अवदत् ?

32. "सागर इव तिष्ठतु ते यशः" ।

क: पाठः ? क: अवदत् ? कम् अवदत् ?

**X. 33. सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) गजस्तत्र

b) तथैव

c) मयूरो नृत्यति ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

34. ''प्रस्थादुदस्थात् प्रथमानवेगः'' ।

**XII. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

35. डा० बा. श्री. रामकृष्णराव् ।

**अथवा**

'भासः' ।

36. वेदव्यासः ।

**XIII. पद्यपाठस्य नाम विलिख्य, तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **4 × 3 = 12**

37. गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।

निधये सर्वविद्यानां दक्षिणामूर्तये नमः ।।

38. पत्र पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहतमश्नामि प्रयतात्मनः ।।

39. भाषा भिन्ना, वेषो भिन्नः

नीतिर्भिन्ना नियमो भिन्नः ।

भिन्ना जातिः भिन्नञ्च कुलम्

भिन्नावेव हि मतधर्मौ ।।

40. आरम्भगुर्वी क्षयिणी क्रमेण

लघ्वी पुरा वृद्धिमती च पश्चात् ।

दिनस्य पूर्वार्धपरार्धभिन्ना

छायेव मैत्री खलसज्जनानाम् ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

41. सदयं ............................................................................ ।

............................................................................ किम् ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत। 3 × 4 = 12**

42. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ? विवृणुत ।

43. 'उभयभारती भारतस्य आदर्शनारी' इति विषय सङ्गृह्य लिखत ।

**अथवा**

'विक्रमः वेतालश्च' इत्यस्य पाठस्य सारांश लिखत ।

44. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत । 1 × 5 = 5**

45. 'आयुर्वेदः' इति अस्माकं देशीय-वैद्यशास्त्रस्य नाम । "अनेन पुरुषः आयुः विन्दति वेत्ति च" इति व्याख्या आयुर्वेदस्य उद्देशं वर्णयति । चरकसंहिता, सुश्रुतसंहिता, वाग्भटस्य अष्टाङ्गहृदयः, अष्टाङ्गसङ्ग्रहः च ग्रन्थाः आयुर्वेदे प्रयाताः । एते सर्वे ग्रन्थाः संस्कृतभाषायामेव सन्ति । आयुर्वेदः ऋग्वेदस्य उपवेदः इति परिगण्यते । मानवशरीरे स्थितानां भौतिकपदार्थानाम् अध्ययनम् आयुर्वेदस्य विषयः । रुधिर, मांसः, अस्थीनि इत्यादयः अस्माकं शरीरे स्थिताः भौतिकावयवाः । एतेषां संरक्षणेन अस्माकं स्वास्थ्यं सुष्ठु भवति । एते स्थूलांशाः सन्ति । तथैव सूक्ष्मांशाः अपि सन्ति । एतेषां सूक्ष्मावयवानां विचारान् योगशास्त्रं प्रतिपादयति ।

i) अस्माकं देशीय-वैद्यशास्त्रस्य नाम किम् ?

ii) प्रख्याताः आयुर्वेदग्रन्थाः के ?

iii) आयुर्वेदः कस्य उपवेदः वर्तते ?

iv) केषाम् अध्ययनम् आयुर्वेदस्य विषयः ?

v) सूक्ष्मावयवानां विचारान् किं प्रतिपादयति ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

46. "परिसरः" ।

**अथवा**

"कर्णाटकराज्योत्सवः" ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

47. बेलगाविमण्डलस्य सर्वकारीय-विद्यालयस्य छात्रः/छात्रा इति मत्वा उत्सवनिमित्तं दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं निवेद्य पितरं प्रति पत्रं लिखत ।